Roll No. ........................ Total No. of Pages : 6

Total No. of Questions : 23

# प्रथमा तृतीय वर्ष (8वीं) वार्षिक परीक्षा 2025-26

## विषय कोड : 0805

## ज्योतिषम् एवं वैदिक गणित

## (मुहूर्तचिन्तामणिः)

**समय : 3 घण्टे** **पूर्णांक : 80**

---

निर्देशाः –
- सर्वे प्रश्नाः संस्कृतभाषायाम् समाधेयाः।
- प्रश्नानां समक्षम् अङ्का प्रदत्ताः सन्ति।
- प्रश्नक्रमाङ्कः 01 तः 05 प्रश्नपर्यन्तं प्रदत्तेषु उपप्रश्नेषु प्रत्येकस्य उपप्रश्नस्य कृते 01 अङ्कः निर्धारितः अस्ति।
- प्रश्नक्रमाङ्कः 06 तः 12 पर्यन्तं प्रदत्तेषु अतिलघूत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते (02) अङ्कद्वयं निर्धारितमस्ति। अतिलघूत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्रायः विंशतिशब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्कः 13 तः 17 प्रश्नपर्यन्तं प्रदत्तेषु लघूत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते (03) अङ्कत्रयं निर्धारितमस्ति। लघूत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्रायः चत्वारिंशत शब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्कः 18 तः 21 प्रश्नपर्यन्तं प्रदत्तेषु दीर्घोत्तरीयप्रश्नेषु प्रत्येकस्य प्रश्नस्य (04) चत्वारः अङ्काः निर्धारिताः सन्ति। दीर्घोत्तरीय प्रत्येकस्य प्रश्नस्य उत्तरं प्रायः अशीतिशब्देषु दातव्यं भवति।
- प्रश्नक्रमाङ्कः 22 तः 23 प्रश्नपर्यन्तं प्रदत्तेषु विश्लेषणात्मकप्रश्नेषु प्रत्येकस्य प्रश्नस्य कृते (05) अङ्काः निर्धारिताः सन्ति। विश्लेषणात्मक प्रत्येकस्य प्रश्नस्य उत्तरं प्रायः विंशत्यधिकैकशतम् शब्देषु दातव्यं भवति।
- लघूत्तरीय-दीर्घोत्तरीय-विश्लेषणात्मकप्रश्नेषु विकल्परूपेण (अथवा रूपेण) प्रश्नाः प्रदत्ताः सन्ति। द्वयोः विकल्पयोः एक एव प्रश्नः समाधेयः।

## (वस्तुनिष्ठप्रश्ना:)

1. उचितं विकल्पं चित्वा उत्तरं ददत : 5×1=5

(क) 'द्वितीया' इति तिथेः स्वामिः अस्ति :

(अ) वह्निः (ब) ब्रह्मा

(स) गौरी (द) गणेशः।

(ख) द्वितीया—सप्तमी—द्वादशी तिथीनां संज्ञा अस्ति :

(अ) नन्दा (ब) भद्रा

(स) जया (द) रिक्ता

(ग) भाद्रपदमासे के शून्यतिथी भवतः ?

(अ) प्रतिपदा-द्वितीया (ब) तृतीया-द्वितीया

(स) अष्टमी-नवमी (द) एकादशी-द्वादशी

(घ) रविवासरे यदि द्वादशीतिथिः भवति चेत् कः योगः भवति ?

(अ) यमघण्टयोगः (ब) हुतासनयोगः

(स) विषयोगः (द) दग्धयोगः

(ङ) मृगशिरानक्षत्रस्य स्वामी कः अस्ति ?

(अ) अग्निः (ब) ब्रह्मा

(स) चन्द्रमा (द) शिवः।

2. अधोलिखितानि रिक्तस्थानानि कोष्ठकात् उचितं विकल्पं चित्वा पूरयत : 5×1=5

(क) मृगान्त्याचित्रामित्रर्क्षं .................... मैत्रं भृगुस्तथा। (क्रूरं/मृदु)

(ख) मूल-आश्लेषा मिश्रसंज्ञकानि उग्रसंज्ञकानि च नक्षत्राणि .................... भवन्ति। (ऊर्ध्वमुखानि/अधोमुखानि)

(ग) पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः .................... शुभाः। (क्रये/विक्रये)

(घ) .................... वसुपुष्यधातृजलभद्वीशार्य्यमान्ताभिधम्। (मन्दाक्षं/अन्धाक्षं)

(ङ) उग्रसंज्ञकनक्षत्रेषु रविवासरे सूर्यसंक्रान्तिः भवति चेत् .................... संक्रान्तिः भवति। (घोरा/ध्वांक्षी)

3. समुचितं युग्ममेलनं कुरुत : 5×1=5

(क) लघुसंज्ञकनक्षत्रेषु सोमवासरे च संक्रान्तिः भवति — (अ) समसंज्ञकानि भवन्ति

(ख) धनु-मीन-कन्या-मीनराशिषु सूर्यसंक्रान्तिः भवति — (आ) सुप्ता

(ग) मृदुसंज्ञक-क्षिप्रसंज्ञक-धनिष्ठा, श्रवण, कृत्तिका, मघा, मूल पूर्वात्रयाणि च नक्षत्राणि — (इ) विद्धः (अशुभः)

(घ) तैतिल-नाग-चतुष्पदकरणेषु संक्रान्तौ रवेः अवस्था भवति — (ई) षडशीतिमुखनामक

(ङ) गोचरे जन्मराशितः षष्ठे शुभः द्वादशभावे च स्थितः सूर्यः भवति — (उ) ध्वांक्षी नामक

4. सत्यकथनानां समक्षं 'सत्यम्' असत्यकथनानां समक्षं च 'असत्यम्' इति लिखत। कथनम्

5×1=5

| कथनम् | सत्यम्/असत्यम् |
|---|---|
| (क) जन्मनक्षत्रे यदि सूर्यग्रहणमथवा चन्द्रग्रहणं भवति चेत् मरणमथवा मरणतुल्यकष्टं भवति। | ...................... |
| (ख) चन्द्रमा यदि पापग्रहाणां मध्ये अथवा पापग्रहयुते अथवा पापग्रहात् सप्तमस्थाने भवति चेद् अशुभफलप्रदो भवति। | ...................... |

1\. (ग) सूर्यग्रहस्य दोषनिवारणार्थं मध्ये माणिक्यरत्नधारणं करणीयम्। ....................

(घ) चन्द्रमसः प्रवासादि एकादशावस्थाः भवन्ति। ....................

(ङ) जन्मकालात् एकादशे द्वादशे वा दिवसे मृदु-ध्रुव-क्षिप्र-संज्ञकनक्षत्रेषु शुभदिवसतिथिषु जातकर्मसंस्कारः नामकरणसंस्कारश्च करणीयम्। ....................

5\. निम्नलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत : 5×1=5

(क) बालो यदि षष्ठे मासे सदशनो (दन्तयुक्तो) भवति चेत् तस्य किं फलम् ?

(ख) बालिकायाः अन्नप्राशनसंस्कारः कस्मिन् मासे शुभयोगेषु करणीयः ?

(ग) बालकस्य कस्मिन् वर्षे मुण्डनसंस्कारः करणेन शुभो भवेत् ?

(घ) जातकस्य अक्षरारम्भसंस्कारः कस्मिनवर्षे करणेन शुभफलप्रदो भवेत् ?

(ङ) जातकस्य कस्मिन् वर्षे केशान्तसंस्कारः करणीयः ?

**(अतिलघूत्तरीयप्रश्नाः)**

6\. क्रमानुसारं तिथिस्वामीनां वर्णनं कुरुत। 2

7\. मर्त्यलोके भद्रावासः कदा भवति ? 2

8\. चरसंज्ञकानि कानि नक्षत्राणि भवन्ति ? 2

9\. बीजगेहशान्त्यारामादि कर्माणि केषु नक्षत्रेषु करणेन सिद्धानि भवन्ति ? 2

2\. 10. बृहत्संज्ञकनक्षत्रेषु सूर्यसंक्रान्तिः भवति चेत् मुहूर्तकालं कति भवति ? 2

11\. नवताराणां नामानि लिखत। 2

12\. गर्भकालीन दशमासानां स्वामिनः के ? तेषां नामानि लिखत। 2

**(लघूत्तरीयप्रश्नाः)**

13\. आनन्दादि अष्टाविंशतियोगानां नामानि लिखत। 3

**अथवा**

दोषनाशक–रवियोगः कदा भवति इति स्पष्टयत ?

14. नक्षत्रसहितं नक्षत्रस्वामीनां वर्णनं कुरुत। 3

**अथवा**

बीजवपनमुहूर्त–वर्णनसहितं राहुवसात् बीजोप्ते: शुभाऽशुभत्वस्य वर्णनं कुरुत।

15. कानि समसंज्ञक–बृहत्संज्ञक–जघन्यसंज्ञकनक्षत्राणि इति लिखत ? 3

**अथवा**

घोरा-ध्वांक्षी-महोदरी-मन्दाकिनी-मन्दा-मिश्रा-राक्षसी च संस्क्रान्तीनां फल सहितं विवेचनं कुरुत।

16. चन्द्रमस: अवस्थानां साधनपूर्वकं तासां नामानि लिखत। 3

**अथवा**

ग्रहदोषनिवारणार्थं औषधिस्नानस्य दानस्य च वर्णनं कुरुत।

17. रजस्वलानन्तरं स्नानमुहूर्तं वर्णयत्। 3

**अथवा**

गर्भाधानमुहूर्तस्य वर्णनं कुरुत।

**(दीर्घोत्तरीयप्रश्ना:)**

18. रव्यादिवारेषु नक्षत्रयोगवशात् सर्वार्थसिद्धियोगस्य विवेचनं कुरुत। 4

**अथवा**

सूर्यादिवारेषु दुष्टमुहूर्तानां (कलांशानां) वर्णनं कुरुत।

19. औषधिनिर्माणस्य भक्षणस्य च मुहूर्तं वर्णयत। 4

**अथवा**

अग्निवासज्ञानं कथं करणीयं ? फलसहितं विवेचनं कुरुत।

P.T.O.

20. ऊर्ध्वमुख—अधोमुख—तिर्यङ्मुखनक्षत्राणि कानि इति स्पष्टयत ?

**अथवा**

लघुसंज्ञक—मृदुसंज्ञक—चरसंज्ञक—नक्षत्राणां फलसहितं विवेचनं कुरुत।

21. विद्यारम्भमुहूर्तस्य वर्णनं विस्तारेण कुरुत। 4

**अथवा**

लग्नशुद्धिसहितं व्रतवन्धमुहूर्तस्य वर्णनं विस्तारेण कुरुत।

**(विश्लेषणात्मकप्रश्नाः)**

22. भद्रायाः परिचयपूर्वकं फलसहितं भद्रावासस्य वर्णनं कुरुत। 5

**अथवा**

चैत्रादिमासपरत्वेन शून्यनक्षत्राणां विवेचनं कुरुत।

23. सीमन्तसंस्कारमुहूर्तपूर्वकं विष्णुपूजा पुंसवनमुहुर्तस्य च वर्णनं कुरुत। 5

**अथवा**

लग्नशुद्धिः सहितं कर्णभेदसंस्कारस्य वर्णनं विशद्रूपेण कुरुत।